न सूतकं दूषयेत्तं ज्ञात्युत्पत्तिमृतादिकम् ॥*॥
छिन्नं नरस्य शीर्षन्तु पतितं यत्र यत्र च ।
यत् शुभञ्चाशुभं वापि पश्वादीनाञ्च तत् शृणु ॥
छिन्नं शिरस्तथैशान्यां नारं दिश्यथ राक्षसे ।
पतितं राज्यहानिञ्च विनाशञ्च विनिर्द्दिशेत् ॥
पूर्व्वाग्नियाम्यवारुण्यवायव्यादिगतं क्रमात् ।
श्रियं पुष्टिं भयं लाभं पुत्त्रलाभं धनं तथा ॥
क्रमाद्विनिर्द्दिशेन्नारं छिन्नशीर्षन्तु भैरव ! ।
उत्तरादिक्रमादेव महिषस्यापि मस्तकः ॥
पतितो वायुकाष्ठान्तं सूचयेद्यत् शृणुष्व तत् ॥
भोग्यं हानिस्तथैश्वर्य्यं वित्तं रिपुजयो भयम् ।
राज्यलाभं श्रियञ्चापि क्रमात्तद्विद्धि भैरव ! ॥
पशूनाञ्चैव सर्व्वेषां छागादीनामशेषतः ।
एवं फलं क्रमाद्विद्याद्दृते जलभवाद्बलौ ॥
अन्यत्र तु श्रियं दद्यात् पतितं शायितं शिरः ॥
यः स्यात् कटकटाशब्दो दन्तानां छिन्नमस्तके ।
नराणां पशुपक्ष्यादिग्राहादीनाञ्च रोगदः ॥
लोतकं चक्षुषोर्जातं यदि स्रवति मस्तके ।
छिन्ने नरस्य राज्यस्य तदा हानिं विनिर्द्दिशेत् ॥
माहिषे मस्तके नेत्राद्यदि स्रवति लोतकम् ।
छिन्ने निवेदिते वैरिभूपमृत्युं तदादिशेत् ॥
अन्येषामथ पश्वादिबलीनां शिरसोऽर्द्दितात् ।
निर्गतं लोतकं धत्ते परां भीतिं गदन्तथा ॥
हसति च्छिन्नशीर्षञ्चेन्नारं स्यात्तु रिपुक्षयः ।
शीघ्रद्धिरायुषो वृद्धिः सदा दातुरसंशयः ॥
यद्यद्वाक्यं निगदति तथा भवति चाचिरात् ।
हुङ्काराद्राज्यहानिः स्यात् श्लेष्मणावाथ पञ्चताम् ॥
देवानां यदि नामानि भाषते च्छिन्नमस्तकः ।
विभूतिमतुलां विन्द्यात् षण्मासाभ्यन्तरे तदा ॥
रुधिरादानकाले तु शकृन्मूत्रे यदि स्रवेत् ।
कार्य्यं तदाधघोर्द्ध्वं वा दातुः स्यान्मरणं तथा ॥
आक्षेपाद्वामपादस्य महारोगः प्रजायते ।
अन्यथाक्षेपचरणैः कल्याणमुपजायते ॥*॥
महिषस्य तु रक्तस्य मानुषस्याथ साधकः ।
अङ्गुष्ठानामिकाभ्यान्तु किञ्चिदुद्धृत्य भूतले ॥
महाकौशिकमन्त्रेण निक्षिपेद्बलिसुत्तमम् ।
देवेभ्यः पूतनादिभ्यो नैरृत्यां दिशि पूर्व्वतः ॥
महिषः पञ्चवर्षो यः पञ्चविंशतिवार्षिकः ।
बलिर्द्देयो नरो देवि तस्य रक्तन्तु भूतले ॥
नैघवीजत्रयं कामवीजं हान्तात् प्रजापतिः ।
वह्निवीजं षट्स्वराभ्यां संपृक्तञ्च तथापरः ॥
स एवैतास्तथैतान्नदादिवर्गान्तसंयुतः ।
षष्ठस्वरशिखाविन्दुचन्द्रयुक्तस्तथापरः ॥
हिमांशिकावीजकान्तः कौशिकीत्यभिमन्त्रणम् ।
एष बलिः स्वाहेति च मन्त्रोऽयं कौशिकः स्मृतः ॥
नृपो वैरिबलिं दद्यात् खड्गमामन्त्र्य पूर्व्वतः ॥
महिषं वाथवा च्छागं वैरिनाम्नाभिमन्त्र्य च ।
सूत्रेण वदनं बद्ध्वा त्रिधा तस्य च मन्त्रकैः ।
छित्त्वा तस्योत्तमाङ्गन्तु देव्यै दद्यात् प्रयत्नतः ॥
यदा यदा रिपोर्वृद्धिर्ब्बलिदानं तदापरम् ।
दद्यात्तथा शिरश्छित्त्वा रिपोस्तस्य क्षयाय च ॥

प्राणप्रतिष्ठाञ्च रिपोः कुर्य्यात्तस्मिन् पशावथ ।
तस्मिन् क्षीणे रिपुप्राणाः क्षीयन्ते विपदा युताः ॥
आदौ विश्वरूपिणी च चण्डिकेति ततः परम् ।
वैरिणन्त्वमुकञ्चेति स्वाहेत्यन्तेति तं पुनः ॥
वह्निभार्य्यां ततः पश्चात् खड्गमन्त्रं प्रकीर्त्तितम् ।
स्वयं स वरी यो देष्टि तमिमं पशुरूपिणम् ॥
विनाशय महामारि स्फें स्फें खादय खादय ॥
इत्यनेन तु मन्त्रेण बलेः शिरसि पुष्पकम् ।
दद्यात्ततस्तद्रुधिरं द्व्यक्षराभ्यां निवेदयेत् ।
महानवम्यां शरदि यद्येवं दीयते बलिः ।
तदा तदाद्याङ्गभवैर्मांसैर्होमं समाचरेत् ॥
दुर्गातन्त्रेण मन्त्रेण प्रणीते दहने शुचौ ।
एवं दत्त्वा बलिं मर्त्यो रिपुक्षयमवाप्नुयात् ॥*॥
नाभेरधस्ताद्रुधिरं पृष्ठभागस्य च प्रिये ! ।
स्वगात्ररुधिरं दद्यान्न कदाचन साधकः ॥
ओष्ठस्य चिवुकस्यापि नेन्द्रियाणाञ्च मानवः ।
कण्ठाधो नाभितश्चोर्द्ध्वं बाह्वोः पार्श्विस्तते तथा ॥
प्रदद्याद्रुधिरं घातं नातिकुर्य्याच्च साधकः ।
गण्डयोश्च ललाटस्य भ्रुवोर्मध्यस्य शोणितम् ॥
कर्णाग्रस्य च बाह्वोश्च स्तनयोरुदरस्य च ।
कण्ठाधो नाभितश्चोर्द्ध्वं ह्यङ्गस्य यतस्ततः ।
पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ॥
न गुल्फतोऽसृक् प्रदद्यात् जङ्घोर्वापि च साधकः ।
न च रोगाविलादङ्गान्नान्यघाताच्च भैरव ! ॥
तदर्थे च क्षताघातात् सम्यक् क्षुब्धमानसः ।
स्रुतं रक्तं प्रदद्यात्तु पद्मपुष्पस्य पत्रके ॥
सौवर्णे राजते पात्रे कांस्ये पात्रे च मानवः ।
निधाय देव्यै दद्यात्तु तद्रक्तं चन्द्रमन्त्रकैः ॥
क्षणने छुरिकाखड्गं संकुलादि यदस्त्रकम् ।
घातेन दद्दस्यास्य महाफलमवाप्नुयात् ॥
पद्मपुष्पस्य पत्रन्तु यावद्गृह्णाति शोणितम् ।
तत्प्रमाणचतुर्भागाधिकं रक्तन्तु साधकः ।
न कदाचित् प्रदद्यात्तु नाङ्गच्छेदमथाचरेत् ॥
यः स्वहृदयसंजातं मांसं माषप्रमाणतः ।
तिलसक्तुप्रमाणाद्वा देव्यै दत्त्वा तु भक्तितः ।
षण्मासाभ्यन्तरे तस्मात् काममिष्टमवाप्नुयात् ॥
बाह्वोस्तु स्कन्धयोर्वापि यो दद्याद्दीपवर्त्तिकाम् ।
हृदये वा स्नेहपात्रं विना भक्त्या तु साधकः ।
क्षणमात्रेण तद्दीपप्रदानस्य फलं शृणु ॥
भुक्त्वा च विपुलान् भोगान् देवीगेहे यथेच्छया ।
कल्पत्रयन्तु संस्थाय सार्व्वभौमो नृपो भवेत् ॥
महिषस्य शिरश्छिन्नं सप्रदीपं शिवापुरः ।
हस्ताभ्यां यः समादाय अहोरात्रञ्च तिष्ठति ॥
स चिरायुः पूतमूर्त्तिरिह भुक्त्वा मनोरमान् ।
भोगांस्तेन मदृगृहगो गणानामधिपो भवेत् ॥
नरस्य शीर्षमादाय साधको दक्षिणे करे ।
वामे सरुधिरं पात्रं गृहीत्वा निशि चाग्रतः ॥
यावद्यामं स्थितो मर्त्यो राजा भवति चेह वै ।
मृते मम पुरं प्राप्य गणानामधिपो भवेत् ॥
क्षणमात्रं बलीनां यः शिरोरक्तं करद्वये ।
गृहीत्वा चिन्तयेद्देवीं पुरस्तिष्ठति मानवः ।
स कामानिह संप्राप्य देवीलोके महीयते ॥

महामाये ! जगन्माये ! सर्व्वकामप्रदायिनि ! ।
ददामि देहरुधिरं प्रसीद वरदा भव ॥
इत्युक्त्वा मूलमन्त्रेण नतिपूर्व्वं विचक्षणः ।
स्वगात्ररुधिरं दद्यान्मानवः सिद्धसन्निभः ॥
येनात्ममांसं सत्येन ददामीश्वरि ! भूतये ।
निर्व्वाणं तेन सत्येन देहि हुं हुं नमो नमः ॥
इत्यनेन तु मन्त्रेण स्वमांसं वितरेद्बुधः ।
सौभाग्यं सुखसम्पन्नं प्रदीपं परमं शुचिम् ॥
दीपयन् मांसमिहजं दीपं ह्रौं ह्रौं नमो नमः ।
इत्यनेन तु मन्त्रेण दीपं दद्याद्विचक्षणः ॥
महानवम्यां शरदि रात्रौ स्कन्दविशाखयोः ।
यवचूर्णमयं कृत्वा रिपुं न्यग्रोधमेव वा ॥
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ।
अनेनैव तु मन्त्रेण खड्गमामन्त्र्य यत्नतः ॥
रक्तं किलकिली घोरघोरा धारविहिंसकः ।
ब्रह्मशिखाम्बिकाशिख्यममुकञ्चारिसत्तमम् ।
भान्तो विसर्गसहितः स च विन्दुयुतोऽपरः ।
ब्रह्माग्नियोगचन्द्रेण विन्दुना च समन्वितः ।
शिरश्छित्त्वा बलिं दद्यात् कृत्वा तस्य तु मन्त्रतः ॥
अनेनैव तु मन्त्रेण विन्दुना च समन्वितः ।
षडन्तो बलिषु प्रोक्तः खड्गः स्कन्दविशाखयोः ॥
रक्तद्रवैः सेचयित्वा कृत्रिमं तं रिपुं बलिम् ।
कुचन्दनस्य तिलकं ललाटेऽभिनिवेशयेत् ॥
रक्तमाल्यधरं कृत्वा रक्तवस्त्रधरन्तथा ।
कण्ठे बद्ध्वा रक्तसूत्रैर्नाभौ शल्यञ्च कृत्रिमम् ।
दत्त्वोत्तरशिरः स्कन्धं कृत्वा खड्गेन छेदयेत् ॥
शिरस्तस्य ततो दद्यात् स्कन्दाय ते नमस्ततः ।
चतुर्द्दशस्वराभ्यां संसक्तः स परः समः ॥
परतः सरतः पूर्व्वं चन्द्रविन्दुसमन्वितः ।
स्कन्दस्य मूलमन्त्रोऽयं तेन तस्मै बलिं हरेत् ॥
चतुर्द्दशस्वराभ्यां षष्ठतोयन्तु पूर्व्ववत् ।
प्रोक्तो विशाखमन्त्रोऽयं तेन तस्मै बलिं हरेत् ॥
कुटिलाक्षौ धूम्रपिङ्गवर्णौ रक्ताम्बरधारिणौ ।
त्रिशूलं करवालञ्च पाणिभ्यां दक्षिणे तथा ॥
बिभ्रतौ नृकपालञ्च कर्त्तृकाञ्चापि वामतः ।
त्रिनेत्रौ नरमुण्डानां मालामुरसि बिभ्रतौ ॥
विकटौ दशनैर्भीमगर्वेशौ द्वारपालकौ ।
ध्यानेन चिन्तयेद्देव्याः पुरतः संस्थितौ सदा ॥
चैत्रे मासि सिते पक्षे चतुर्द्दश्यां विशेषतः ।
बलिभिर्महिषैश्छागैर्मांसैश्च भैरवरूपिणम् ।
तोषयेन्मधुभिर्मत्स्यैस्तेन तुष्याम्यहं सतौ ।
चण्डिकाबलिदानेन बलेः शीर्षं क्षणेन तु ।
अभिषिच्य तु मन्त्रेण मूलेनैव निवेदयेत् ॥
ईषत् प्राणन्तु बहुधा चालितं पूर्व्वमर्च्चितम् ।
वीक्षेत् कामस्य सिद्धिन्तु सिद्ध्यभावञ्च साधकः ॥
सितप्रेतो रथस्थोऽयं योगपीठस्य सन्निभः ।
ध्यायेद्यस्मिन् महामाया सिद्धिं बोधयते यमः ॥
अनेनामन्त्रितं शीर्षं न चिराद्यदि वेपते ।
तत्कार्य्यस्य तदा सिद्धिरसिद्धिस्तु विपर्य्ययात् ॥
एवं दद्द्बलिं वीरो यथोक्तविधिनात्मना ।
बलिदानादेव चतुर्व्वर्गमाप्नोत्यसंशयम् ।